मानव विवाह मन्त्राः

१.८.९. क इदं कस्मा अदात् कामः कामायादात् ।
कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविवेश ।
कामेन त्वा प्रतिग्रह्णामि कामैतत्ते ॥

१.८.१०. समाना व आकूतानि समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥

१.८.११. खे रथस्य खे नसः खे युगस्य शतक्रतो ।
अपालामिन्द्रस्त्रिः पूर्त्यवकृणोत्सूर्यत्वचम् ॥

१.९.७. विराजो दोहोसि । विराजो दोहमशीय । मयि दोहः पद्यायै विराजः ॥

१.९.८. अहं वर्ष्म सदृशानामुद्यतामिव सूर्यः । इदं तमभितिष्ठामि यो मा
कश्चाभिदासत् ॥

१.९.१३. नमो रुद्राय पात्रसदे । नमो रुद्राय पात्रसद ॥

१.९.१४. मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥
मधुनक्तमुतोषसो मधुमत् पार्थिवं रजः । मधु द्योरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वोर्गावो भवन्तु नः ॥

१.९.२०. हतो मे पाप्मा पाप्मानं मे हत । यां त्वा देवा वसवोऽन्वजीविषुरादित्यानां
स्वसारं रुद्रमातरम् । दैवीं गामादितिं जनानामारभन्तामर्हतामर्हणाय ॥

१.९.२३. माता रुद्राणां दुहिता वसूनां स्वसादित्यानामृतस्य नाभिः । प्र नु वोचं चिकितुषे
जनाय मा गामनागामदितिं वधिष्ठ ।ॐ उत्सृजत तृणान्यत्तूदकं पिबत ॥

१.९.२४. अलंकरणमसि सर्वस्मा अलं मे भूयासम् ॥

१.९.१५. प्राणापानौ मे तर्पय समान व्यानौ मे तर्पय उदानरूपे मे तर्पय ।
सुचक्षा अह मक्षिभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम् ॥

१.९.२७. परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्तु शतं जीवमेशरदः ।
पुरूची रायस्पोषमभिसँव्ययिष्ये यशसा माऽद्यावा पृथिवी ।
यशसेन्द्रा बृहस्पती यशो भगश्च मारिषद्यशो मा प्रति मुच्यताम् ॥

१.१०.६. अघोर चक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुस्पदे ॥

१.१०.७. हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥

१.१०.८. या अकृन्तन्या अतन्वन्या अवाहरन् याश्चाग्नादेव्योऽन्तानभितोऽततनन्त ।
तास्त्वादेव्यो जरसे सँव्ययन्त्वायुष्मतीदं परिधत्स्व वासः ॥
१.१०.१०. सोमोददद्गन्धर्वाय गन्धर्वो दददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो
इमाम् अग्निरस्याः प्रथमो जातवेदाः सोऽस्याः प्रजा मुञ्चतु मृत्युपाशात् ।
तदिदं राजा वरुणोऽनुमन्यताम् । यथेद्रँस्त्रीपौत्रमगन्म रुद्रियाय ॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
प्रद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥
१.१०.१३. तस्याँ व्रते ते हृदयं दधातु मम चित्तमनुचितं तेऽस्तु ।
मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तुमह्याम् ॥
१.१०.१४. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याँहस्तं गृह्णाम्यसाव ।
गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सत् ।
भगो अर्यमा सविता पुरन्धि र्मह्यं त्वादुर्गार्हपत्याय देवाः ।
सरस्वति प्रेदमव सुभगे वाजिनीवति ।
यां त्वा विश्वस्य भुतस्य भव्यस्य प्रगायाम्यस्याग्रतः ॥
अमोह मस्मि सा त्वं सा त्वमस्यप्यमोहम् ।
द्योरहं पृथिवी त्वमृक् त्वमसि सामाऽहम् रेतोह मस्मि रेतो धत्तम् ॥
ता एव विवाहवहै पुँसे पुत्राय कर्त्तवै । श्रीये पुत्राय वेधवै ॥
रायस्पोषाय सुप्रस्त्वाय सुवीर्याय ॥
१.१०.१६. एतमश्मानमातिष्ठतमश्वेव युवां स्थिरौ भवतम् कृण्वन्तु विश्वे देवा आयुर्वां
शरदःशतम् ॥
१.१०.१७. यथेन्द्रः सहेन्द्राण्या अवारुहद् गन्धमादनात् ।
एवं त्वमस्मादश्मनो अवरोह सह पत्न्या ॥
१.१०.१८. आरोहस्व समे पादौ प्र पूर्व्यायुष्मती कन्ये पुत्रवती भव ॥
१.११.६. सं त्वा नह्यामि पयसा पृथिव्याः संत्वा नह्याम्यद्भिरोषधीभिः ।
सं त्वा नह्यामि प्रजया धनेन सा सन्नद्धा सुनुहि भगधेयम् ॥
१.११.९. यानिरक्षाँस्यभितो व्रजन्त्यस्या वध्वा अग्निसकाश मागच्छन्त्याः ।
तेषामहं प्रतिविध्यामि चक्षुः स्वस्ति वध्वै भूतपतिर्दधातु ॥

१.११.१२. अर्यमणं नु देवं कन्या अग्निमयक्षत ।
सोस्मान्देवोऽर्यमा प्रेतो मुञ्चातु मामुतः ॥
तुभ्यमग्रे पर्यवहन्त्सूर्यांवहतुना सह ।
पुनः पतिभ्यो जायां दा अग्नेः प्रजया सह ॥
पुनः पत्नी मग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥
इयं नार्युपब्रूतेऽनौलाजावपन्तिका ।
दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥
१.११.१८. एकमिषे द्वे ऊर्जे त्रीणि प्रजाभ्यश्चत्वारि रायस्पोषाय  पञ्च भवाय षड्तुभ्यः ।
सखा सप्तदीभव सुमृडीका सरस्वती । सा ते व्योम संदृशी । विष्णुस्त्वा
मुन्नयत्विति सर्वत्रानुषजति ॥
१.११.२०. इमँ विष्यामि वरुणस्य पाशँ यज्जग्रन्थ सविता सत्यधर्मा ।
धातुश्च योनौ सुकृतस्य लोके रिष्टां मा सह पत्या दधातु ॥
१.१२.१. सुमङ्गलीरियँ वधूरिमां समेत पश्यतः ।
सौभाग्यमस्यै दत्वायाथास्त्वं विपरेतन ॥
१.१२.३. अभ्यज्य केशान् सुमनस्यमानाः प्रजावरीर्यशसे बहुपुत्रा अघोराः ।
शिवा भर्तुः श्वशुरस्यावदायायुष्मतीः श्वश्रूमतीश्चिरायुः ॥
१.१२.४. समस्य केशानवृजिनानघोरान् शिखा सखिभ्यो भव सर्वाभ्यः ।
शिवा भव सुकुलोह्यमाना शिवा जनेषु सहवाहनेषु ॥
१.१३.४. अङ्कून्यङ्कवभितो रथँ ये ध्वान्ता वाता अग्निमभिये संचरन्ति ।
दूरे हेतिः पतत्री वाविनी वाँस्ते नोऽग्नयः पप्रयः पालयन्तु ॥
१.१३.६. सुकिँशुकँ शल्मलिँ विश्वरूपँ हिरण्यवर्णँ सुवृतँ सुचक्रम् ।
आरोह सूर्ये अमृतस्य लोकँ स्योनं पत्ये वहतं कृणुष्व ॥
१.१३.७. अनुमायन्तु देवता अनुब्रह्म सुवीर्यम् । अनुक्षत्रं तु यद्बल मनुमामैतु मद्यशः ॥
१.१३.८. प्रतिमायन्तु देवताः प्रतिब्रह्म सुवीर्यम् । प्रतिक्षत्रं तु यद्बलं प्रति मामैतु
यद्यशः ॥
१.१३.१०. नमो रुद्राय ग्रामसद ॥
१.१३.११. नमो रुद्रायैक वृक्षसद । ये वृक्षेषु शष्पिञ्जरा ॥
१.१३.१२. नमो रुद्राय श्मशानसद । ये भूताना मधिपतय ॥

१.१३.१३. नमो रुद्राय चतुष्पथसद । ये पथां पथि रक्षय ॥
१.१३.१४. नमो रुद्राय तीर्थसद । ये तीर्थानि प्रचरन्तीति ॥
१.१३.१५. समुद्राय वैणवे सिन्धूनां पतये नमः । नमो नदीनाँ सर्वासां पत्ये ।
विश्वाहा जुषताँ विश्वकर्मणामिदँ हविः स्वः स्वाहेत्यप्सूदकाञ्जलीन्निनयति ।
अमृतं वा आस्ये जुहोम्यायुः प्राणेऽप्यमृतं ब्रह्मणा सह मृत्युन्तरति ।
प्रासहादिति रिष्टिरिति मुक्तिरिति मुक्षीयमाणः सर्वं भयं नुदस्व ॥
१.१३.१८. जवेन शिवेन वैश्वानर इडयास्याग्रतः ।
आचार्यो येन येन पथा प्रयाति तेन तेन सह ॥
१.१४.५. येष्वध्येति प्रवसन्येषु सौमनसं महत् ।
तेनोपव्हयामहे ते नो जानन्त्वागतम् ॥
१.१४.६. गृहानहँ सुमनसः प्रपद्ये वीरँहि वीरवतः सुशेवा ।
इराँवहन्ती घृतमुक्षमाणास्तेष्वहँ सुमनाः सँवसाम ॥
१.१४.८. सोमेनदित्या बलिनः सोमेन पृथिवी मही ।
असौ नक्षत्राणामेषामुपस्थे सोम आहितः ॥
१.१४.१०. अच्युता ध्रुवा ध्रुवपत्नी ध्रुवं पश्येम सर्वतः ।
ध्रुवासः पर्वता इमे ध्रुवा स्त्री पतिकुलेयम् ॥
१.१४.१२. चक्रीवानडुहौ वा मे वाङ्मैतु ते मनः ।
चाक्रवाकँ सँ वननं तन्नौ सं वननं कृतम् ॥
१.१४.१६. अपश्यं त्वा मनसा चेकितानां तपसो जातं तपसो विभूतम् ॥
इह प्रजामिह रयिँरराणः प्रजायस्व प्रजया पुत्रकाम ॥
अपश्यं त्वा मनसा दीध्यानां स्वायां तनूँ ऋत्विये बाधमानम् ।
उप मामूच्चा युवतिर्बभुयाः प्रजायस्व प्रजया पुत्रकामे ॥
प्रजापतिस्तन्वं मे जुषस्व त्वष्टा देवैः सहमान इन्द्रः ।
विश्वेदेवैर्ऋतुभिः सँ विदानः पुँसां बहूनां मातरौ स्याव ॥
अहं गर्भ मदधामोषधीष्वहँ विश्वेषु भुवनेष्वन्तः ।
अहं प्रजा अजनयं पृथिव्या अहं जनिभ्यो अपरिषु पुत्रान् ॥